अङ्क-२८ वेदविद्या
जुलाई-दिसम्बर २०१६ ISSN-2230-8962

# काण्वमाध्यन्दिनसंहिते-कात्यायनश्रौतसूत्रं च

**रवीन्द्र अम्बादास मुळे**

यजुर्वेदस्तावत् शुक्लकृष्णभेदेन द्विधा विभक्तः। प्राचीनाचार्यैः एकोत्तरशतसङ्ख्याकशाखाप्रभेदेन यजुर्वेदस्योल्लेखः कृतः। परं सर्वाः शाखाः विलुप्ताः केवलं पञ्चशाखा इदानीमुपलभ्यन्ते। कृष्णयजुर्वेदे तावत् तैत्तिरीयशाखा, कठशाखा, मैत्रायणीशाखा कपिष्ठशाखा च उपलभ्यन्ते। शुक्लयजुर्वेदे काण्वशाखा, माध्यन्दिनीशाखा च उपलभ्येते। शुक्लयजुर्वेदस्य उभयोः अपि शाखयोः ब्राह्मणद्वयं शतपथसञ्ज्ञकं पृथक्-पृथक् उपलभ्यते। माध्यन्दिनीये शतपथब्राह्मणे नवमकाण्डं यावत् विषयाणां प्रायः संहिताक्रमेणैव ब्राह्मणक्रमः वर्तते।[१] काण्वसंहितायां प्रथमं दर्शपूर्णमाससम्बन्धिनो मन्त्राः पठिताः परं काण्वशतपथब्राह्मणे आधानसम्बन्धिनः विधिभागः च मन्त्रा च वर्तन्ते। अन्येऽपि विषयक्रमविषये भेदाः वर्तन्ते एव।

शुक्लयजुर्वेदस्य कात्यायनीयमेकमेव श्रौतसूत्रमुपलभ्यते। कर्काचार्येणाऽपि स्वव्याख्यायां सूत्रान्तरकारस्य नाम न उल्लिखितम् अन्यैरपि व्याख्यातृभिः आधुनिकैः विचारशीलैः पाश्चात्यपाण्डितैरपि अन्यत्सूत्रास्तित्वे किंचिदपि न विचारितम्।

कात्यायइदं सूत्रं शुक्लयजुर्वेदसम्बन्धिनीः पश्चदशशाखाः अधिकृत्य वर्तते इति चरणव्यूहे प्रतिपादितम्।[२]

कात्यायनश्रौतसूत्रस्थाः बहवः विधयः, मन्त्राश्च काण्वसंहितां, काण्वशतपथब्राह्मणं च अनुसरन्ति। इत्येतेषां केषांचन अंशानां सङ्कलनं डॉ. थिटेमहोदयैः कृतम्।[३] कात्यायनश्रौतसूत्रस्य स्वरूपं काण्वशाखासम्बद्धमपि वर्तते इत्यपिः तैः चर्चितम्। काण्वमाध्यन्दिनशाखयोर्मध्ये बहुसाम्यं विद्यते अतः तथा स्पष्टतया तयोर्भिन्नत्वं प्रतिपादयितुं न शक्यते । माध्यन्दिनसंहितायां कर्मकाण्डं यथा

---

[१] संहितायां पिण्डपितृयज्ञसम्बन्धिनः मन्त्राः दर्शपूर्णमासानन्तरमेव पठिताः। परं शतपथब्राह्मणे एते मन्त्राः आधानानन्तरं पठिताः। एतावान् भेदः संहिताब्राह्मणयोर्मध्ये वर्तते। अन्यत्र विषयक्रमे कोऽपि संहिताब्राह्मणयोर्भेदो नोपलभ्यते।

[२] अ. शुक्लयजुर्वेदाचे कात्यायन् श्रौतसुत्र आहे- चिं.ग. काशीकर, श्रौतधर्मांची स्वरूपचिकित्सा, पृष्ठ ६, पुणे
ब. वेबर संपा. – कर्कदेवयाज्ञिकयोः टीकया सह.
स. चरणव्यूहम् – यजुर्वेदस्य षडशीतिर्भेदा भवन्ति (चर. द्वितीयखण्डः)

[३] यज्ञ आशय आणि आविष्कार, याज्ञवल्क्य आश्रम पुणे, जून १९७९, पृ. १६४-१७७, कात्यायन श्रौतसूत्र आणि काण्वशाखा

विकसितं तथा काण्वशाखायाः कर्मकाण्डं टीकाः, प्रयोगग्रन्थाः इति रूपेण न विकसितम्। अतः कात्यायनश्रौतसूत्रे माध्यन्दिनसंहिता, माध्यन्दिनशतपथब्राह्मणं च इत्यनयोरेव प्रभावः अधिको वर्तते।

निबन्धेऽस्मिन् चिन्तनं केवलं दर्शपूर्णमासेष्टिविषयमधिकृत्य वर्तते।

श्रौतसूत्राणि प्रायः स्वशाखीयान् मन्त्रान् प्रतीकपाठेन स्वीकुर्वन्ति। उभयोः शाखयोः श्रौतसूत्रमिदमतः कात्यायनश्रौतसूत्रे काण्वमाध्यन्दिनयोः संहितयोः मन्त्राः प्रतीकपाठेन स्वीकृताः इति वक्तुं शक्यते परं काण्वमाध्यन्दिनसंहितयोर्मध्ये बहुसाम्यं विद्यते अतः तत्रस्थाः बहवः मन्त्राः उभयोरपि शाखयोः भवितुमर्हन्ति इति सत्यम्। परं कात्यायनश्रौतसूत्रस्य वैशिष्ट्यमेकं यत् केवलं काण्वशाखीयाः मन्त्राः स्युः तर्हि ते श्रौतसूत्रे सकलपाठेन उद्धृताः। अतः कात्यायनश्रौतसूत्रं माध्यन्दिनशाखाम् आधिक्येन अनुवर्तते किं इति चिन्तनमावश्यकम्।

१. काण्वशाखीयाः मन्त्राः सकलपाठेन स्वीक्रियन्ते कात्यायनश्रौतसूत्रे –

(अ) अग्निहोत्रं हुत्वा यजमानः दर्शपूर्णमासार्थं ब्रह्माणं वृणोति। ब्रह्मा वृतः सन् "अहं भूपतिः....इति मन्त्रं जपति। कात्यायनश्रौतसूत्रे उक्तं यत् "वृतो जपति, अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देव सवितरेतम्.........ब्रह्माहं मनुष्याणाम् (कात्या.श्रौ. ३.१.१८)

देवसवितरेतं....ब्रह्माहं मनुष्याणाम् इति अयं मन्त्रः काण्वसंहितायामेव वर्तते। माध्यन्दिनसंहितायां मन्त्रोऽयं नास्ति काण्वशाखीयो मन्त्रः सकलपाठेनात्र स्वीकृतः।

(आ) दर्शपूर्णमासेष्टौ ब्रह्मा नैर्ऋत्यां दिशि तृणं निक्षिपति। "ब्रह्मसदनात् तृणं निरस्यति "निरस्त पाप्मा सह तेन यं द्विष्म इति (कात्या.श्रौ. २.१.२२) "निरस्त पाप्मा" इत्ययं मन्त्रः केवलं काण्वसंहितायामेव विद्यते (काण्व.सं. २.३.३)। मन्त्रस्य सकलमंशं स्वीकृत्य कात्यायनश्रौतसूत्रे प्रदत्तः।

(इ) प्रधानयागानन्तरं शिष्टात् हविषः यवमात्रं पिप्पलमात्रं वा भागं गृहीत्वा अध्वर्युणा दीयमानं भागं ब्रह्मा "मित्रस्य त्वा..." इत्यनेन मन्त्रेण अवेक्षते।[४] काण्वसंहितास्थः एव मन्त्रोऽयं श्रौतसूत्रे सकलपाठेन उद्धृतः।

(ई) या अप्स्वन्तर्देवता......सादयामि (काण्व. सं २.३.७) मन्त्रोऽयं काण्वसंहितायामेवास्ति सकलपाठेन कात्यायनश्रौतसूत्रे स्वीकृतः।[५]

(उ) उलूखले मुसले यच्च.... (काण्व.सं. २.५.२,३) 'पिष्टलेपाहुतिः' इत्यस्मिन् प्रसङ्गे आगतोयं मन्त्रः । अयं मन्त्रः काण्वसंहितायामेव वर्तते कात्यायनश्रौतसूत्रे सकलपाठेन स्वीकृतः।[६]

---

[४] "मित्रस्य त्वा चक्षुषा प्रतीक्षे" (काण्व.सं. २.३.४) इति प्राशित्रं प्रतीक्षते (कात्या. श्री. २.२.१३)

[५] प्रक्षाल्यपात्रं नाभिमालभते "या अप्स्वन्तर्देवता.... सादयामि इति (कात्या. श्रौ. २.२.१८)

[६] उलूखले मुसले यच्च.... पिष्टलेपान् जुहोति (कात्या.श्रौ. ३.८.१)

(ऋ) आप्यायतां ध्रुवा हविषा.... (काण्व. सं. २.५.३) इत्ययं मन्त्रः कात्यायनश्रौतसूत्रे (३.३.१२) इत्यत्र सकलपाठेन उद्धृतः। माध्यन्दिनसंहितायां मन्त्रोऽयं नास्ति।

(ॠ) कात्यायनश्रौतसूत्रे ४.२.१२ इत्यत्र काण्वशाखीयः मन्त्र "वेषोऽस्युपवेषो द्विषतो ग्रीवा.... (काण्व.सं.२.५.७,८) सकलपाठेन स्वीकृतः।

(ए) जुहोमि त्वा सुभग सौभगाय....(काण्व.सं. २.५.८) इति अयं मन्त्रः कात्यायनश्रौतसूत्रे ४.२.४३ इत्यत्र सकलपाठेन स्वीकृतः।

(ऐ) प्रजापतेर्भागोऽसि.....इह च (काण्व.सं. २.३.८) इत्यनेन मन्त्रेण अन्वाहार्यं स्पृशति ब्रह्मा। मन्त्रोऽयं कात्यायनश्रौतसूत्रे (३.४.२७) सकलपाठेन उद्धृतः।

(ओ) स्वम्बयजुग्रहणप्रसङ्गे अध्वर्युः स्फ्यं, दर्भं च गृह्णाति "पृथिव्यै.... इति मन्त्रेण। पृथिव्यै वर्मासि। पृथिवि देवयजनि ओषध्यास्ते मूलं मा हिंसिषम् (काण्व.सं. १.९.२)

पृथिविदेवयजन्योषद्ध्यास्ते मूलस्माहिसिषम् (मा.सं. १.२५)

माध्यन्दिनसंहितायां "पृथिव्यै वर्मासि" इति मन्त्रोऽयं न विद्यते। कात्यायनश्रौतसूत्रे स्वतन्त्रं मन्त्रं कल्पयित्वा सकलपाठेन सूत्रे प्रदत्तः।

वेद्यां तृणं निदधाति उदक् "पृथिव्यै वर्मासीति" (कात्या. श्रौ.सू. २.६.८)।

पृथिवि देवयजनि....इत्ययं मन्त्रः उभयत्र वर्तते। मन्त्रस्यास्य विनियोगः "पृथिवि देवयजनीति तृणेऽन्तर्हिते प्रहरति (का.श्रौ.२.६.९)

मन्त्रोऽयं उभयशाखयोर्मध्ये वर्तते अतः प्रतीकपाठेनैव स्वीकृतः।

(औ) कदाचिद् मन्त्रस्वरूपं भिन्नं स्यात् तथापि प्रतीकपाठेन उभययोः संहितयोः मन्त्रः भवितुं शक्यते।

यथा - अदित्यै रास्नासि (मा.सं. १.३०)

अदित्यै रास्नासीन्द्राण्यै संनहनम् (काण्व.सं. १.१०.२)

पत्नीं संनह्यति.... परिहरत्यधीवासोऽदित्यैरास्नेति (कात्या.श्रौ.२.७.१)

काण्वसंहितायां मन्त्रेऽस्मिन् "इन्द्राण्यै संनहनम्" इति अधिको भागो विद्यते परं सूत्रं केवलं "आदित्यै रास्नेति" इत्येव वदति । अतः मन्त्रोऽयं माध्यन्दिनीयः अथवा काण्वशाखीयः इति वक्तुं न शक्यते। उभयोः संहितयोः मन्त्रप्रतीकं समानं स्यात् तर्हि शाखाद्वयसम्बद्धोऽयं मन्त्रः इति सत्यम्। एतादृशानि। मन्त्रप्रतीकानि कात्यायनश्रौतसूत्रे बहूनि विद्यन्ते।

प्रायः सर्वत्र काण्वशाखीयाः स्वतन्त्रमन्त्राः एव सकलपाठेन कात्यायनेन स्वीकृताः अतः प्राधान्येन माध्यन्दिनसंहिता सम्बद्धं कात्यायनश्रौतसूत्रमितिवक्तुं शक्यते।

२. काण्वमाध्यन्दिनसंहितयोर्मध्ये कुत्रचित् भिन्नः पाठः विद्यते। प्रतीकपाठे माध्यन्दिनपाठः एव कात्यायनश्रौतसूत्रे स्वीकृतः। काण्वसंहिताभाष्ये सायणाचार्यैः कात्यायनश्रौतसूत्रे काण्वसंहितानुसारं पाठो स्वीकृतः, सूचितः वा इत्यपि चिन्त्यम्।

(अ) वेदिस्पर्शः एकस्मिन् विधौ उक्तः। विधिममुम् उद्दिश्य माध्यन्दिनसंहितायां मन्त्रो विद्यते-

यज्ञ नमश्चतऽउप च यज्ञस्य....(मा.सं. २.१९)

काण्वसंहितायां मन्त्रोऽयं भिन्नपाठेनोक्तः – यज्ञ शं च त उप च शिवे मे..... (काण्व.सं. २.६.२)

कात्यायनश्रौतसूत्रम्-

यज्ञ नमश्च त इति वेदिमालभते। (कात्य. श्रौ. ३.७.२०)

२. सायणाचार्येण सूत्रमिद- यज्ञ शं च त इति वेदिमालभते (कात्या.श्रौ.३.७.२१) अनया पद्धत्या स्वीकृतम्

श्रौतसूत्रे प्रतीकपाठ "यज्ञ नमश्च....." इति। प्रदत्तः काण्वसंहितायां यज्ञ शं च.....इति वर्तते । (२.६.२) अतः कात्यायनश्रौतसूत्रं माध्यन्दिनसंहितामनुसरति इति स्पष्टम्।

सायणाचार्यैः अत्रस्थ पाठः "यज्ञ शं च त इति वेदिमालभते" (कात्या.श्रौ. ३.६.२१) इति काण्वसंहिताभाष्ये स्वीकृतेः। एतादृशाः बहवः पाठाः सायणाचार्यैः स्वीकृताः। ते एतादृशान् पाठभेदान् किमर्थं स्वीकुर्वन्ति। काण्वसंहिताभाष्यं विद्यते अतः तदनुसारं पाठपरिवर्तनं तैः कृतम् अथवा तेषां पुरतः अन्यदेव कात्यायनश्रौतसूत्रमासीत् यत् काण्वसंहितामनुसरति इति चिन्तनीयम्।

(आ) विष्णुक्रमान् प्रागुद्गवा क्रामेत् इति दर्शपूर्णमासेष्टिविषये विष्णुक्रमः इति एकः विधिः वर्तते। **तत्र श्रौतसूत्रं वदति-**

**१.** विष्णुक्रमान् क्रमते **दिविविष्णुरिति** प्रतिमन्त्रम्। पृथिव्यामितीतऽऊर्ध्वो वा (कात्या.श्रौ.३.८.१०

२. सायणाचार्याः अपि सूत्रमिदमुद्धरन्ति- "विष्णुक्रमान् क्रमेत दिविविष्णुरिति प्रतिमन्त्रम् (कात्या. श्रौ. ३.८.११)

**३.** माध्यन्दिनसंहितायाः पाठो विद्यते यथा - ॐ दिविविष्णुर्व्यक्रस्त जागतेन च्छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि.......(मा.सं. २.२५)

४. काण्वसंहितायाः पाठो विद्यते यथा अन्तरिक्षे विष्णुर्व्यक्रँस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तः। योऽस्मान् द्वेष्टि यं च वयं द्विष्म....(काण्व.सं. २.६.३)

काण्वसंहितायां मन्त्रेऽस्मिन् अन्तरिक्षे इति पदं विद्यते। माध्यन्दिनसंहितायां दिवि पदं विद्यते। कात्यायनश्रौतसूत्रे, सायणाचार्यैरपि दिवि इत्येव पदं स्वीकृतम्। माध्यन्दिनसंहितायाः एव प्रभावः कात्यायनश्रौतसूत्रे अधिको भाति।

(इ) एतन्ते देवसवितर्यज्ञम्प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिन्तेन मा मव (माध्यं २.१२) मन्त्रोऽयं काण्वसंहितायां यथोक्तः तथा नास्ति तथापि सकलपाठेन कात्यायनश्रौतसूत्रे नोद्धृतोऽयं मन्त्रः। कात्यायनश्रौतसूत्रे प्रतीकपाठेन अयं स्वीकृतः। एतं त इति समिदामन्त्रितः प्रसौति (कात्या.श्रौ. २.२.१९)[७]

(ई) बृहद् ग्रावासि व्वानस्पत्यः..........(मा.सं.१.१५०)

[७] काण्वसंहितायां एतत् ते.... इति पाठः वर्तते (काण्व.सं. २.३.१०)

बृहन् ग्रावासि व्वानस्पत्यः.....(काण्व. सं. १.५.४)

बृहद् ग्रावेति मुसलमादत्ते..........(कात्या.श्रौ. २.४.११)

माध्यन्दिनसंहितायाः एव पाठः श्रौतसूत्रे स्वीकृतः । अतः माध्यन्दिनसंहिता सम्बद्धं कात्यायनश्रौतसूत्रमिति वक्तुं शक्यते।

३. सर्वानुक्रमणिकामनुसृत्य कृतः ऋग्यजुषां विभागः माध्यन्दिनसंहितानुसारमेव वर्तते।[८]

४. मन्त्राणां स्थानम् – संहितायां यथाविधि मन्त्राः पठिताः इति सामान्यतः वक्तुं शक्यते। परं काण्वमाध्यन्दिनसंहितयोः मध्ये माध्यन्दिनसंहितायां वर्तमानं मन्त्राणां स्थानं प्रायः योग्यं भाति। यतः-

(अ) पिष्टलेपहोमानन्तरं पत्न्याः वेदयोक्त्रविमोकः भवति। वेदयोक्त्रविमोकप्रसङ्गे मन्त्रोऽयं पठ्यते-

काण्वसंहिता- **वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः।**
**तेन मह्यं वेदो भव॥ (काण्व.सं. १.७.५)**

माध्यन्दिनसंहिता - **व्वेदोऽसि येन त्वन्देव व्वेद देवेभ्यो**
**व्वेदोऽभवस्तेन मह्यं व्वेदो भूयाः॥ (माध्यं. २.२१)**

काण्वसंहितायां मन्त्रोऽयं आज्यावेक्षणप्रसङ्गे सप्तमानुवाके पठितः। सायणाचार्यैः "सप्तमे पेषणमन्त्रा उक्ताः अष्टमे पुरोडाशश्रपणमन्त्रा उच्यन्ते" इत्युक्त्वा सप्तमानुवाकस्य विषयः "हविर्द्रव्यपेषणम्" इत्युक्तः। अतः वेदयोक्त्रविमोकः सप्तमानुवाक्यस्य विषयः एव नास्ति। अध्वर्युः दृषदि तण्डुलान् आवपति। पिनष्टि च इति विषयमधिकृत्य विषयोऽयं प्रवर्तते परं वेदयोक्त्रविमोकः सन्दर्भेऽस्मिन् अनावश्यकः इति भाति।

परं माध्यन्दिनसंहितायाम् मन्त्रोऽयं पिष्टलेपहोमानन्तरमेव पठितः। अतः माध्यन्दिनसंहितायाम् मन्त्रस्य स्थानं योग्यं भाति। **काण्वमन्त्रभाष्ये सायणाचार्याः अपि वदन्ति "अयं मन्त्रः प्रयोगानुसारेण अन्यत्र उत्कर्षणीयः इति।"**

कात्यायनश्रौतसूत्रं वदति - पत्नी वेदं प्रमुञ्चति **व्वेदोसीति** यौक्त्रं च **प्र मा मुञ्चामि वरुणस्य पाशाद्येन माऽबध्नात् सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां मा सह पत्या दधात्विति** (कात्या.श्रौ. ३.८.२)

व्वेदोसीति..... मन्त्रः उभयोः संहितयोर्मध्ये किञ्चित् पाठभेदेन वर्तते।

**परं प्र मा मुञ्चामि**....... दधात्विति मन्त्रः काण्वसंहितायां, माध्यन्दिनसंहितायामपि नास्ति। सौत्रमन्त्रोऽयं इति वक्तुं शक्यते।

आ) आज्यावेक्षणानन्तरं पुरोडाशावभिघारणानन्तरं च तं पुरोडाशम् अनक्ति इति विषयं प्रतिपादयत् सूत्रम् -

"पुरोडाशावभिघार्योद्वास्योपस्तीर्ण्णे निधायानति यस्ते प्राणः .... (कात्या. श्रौ. २.८.१४) इति।"

---

[८] श्रीमत्कात्यायनप्रणीतम् शुक्लयजुर्विधानसूत्रम्। - सम्पा. अण्णाशास्त्री वारे, निर्णय सागर मुद्रणालय, इ.स. १९४३, पृष्ठ २४३

अस्य सूत्रस्य, मन्त्रस्य च कानिचन वैशिष्ट्यानि विद्यन्ते।

१. 'यस्ते प्राणः.....' इति अयं मन्त्रः केवलं काण्वशाखायामेव वर्तते (काण्व सं. १.१०.५)।

अ. अतः कात्यायनश्रौतसूत्रे सकलपाठेन मन्त्रोऽयं स्वीकृतः। परं

आ. काण्वसंहिताभाष्ये सूत्रं निर्दिष्टं परं मन्त्रोऽयं सकलपाठेन न स्वीकृतः। काण्वभाष्ये

पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायानक्ति **यस्ते प्राणः** (कात्या. श्रौ. २.८.१४) इति रूपेण मन्त्रः वर्तते। काण्वसंहितायां यः मन्त्रः विद्यते तस्यैव भाष्यं प्रचलति अतः प्रतीकरूपेण अयं मन्त्रः भाष्ये प्रदत्तः किं इति चिन्त्यम्।

इ. सम्पूर्णं सूत्रं कात्यायनश्रौतसूत्रे वर्तते यथा -

"पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायाऽनक्ति

"यस्ते प्राणः पशुषु प्रविष्टो देवानाँ विष्णवामनु यो वितस्थे।

आत्मन्वान्त्सोम घृतवान् हि भूत्वाऽग्निं गच्छ स्वर्यजमानाय विन्देति (कात्या. श्रौ. २.८.१४)

मन्त्रोऽयं माध्यन्दिनसंहितायां नास्ति अतः सकलपाठेन अत्र स्वीकृतः।

ई. "पुरोडाशाञ्जनप्रसङ्गे मन्त्रोऽयं प्रदत्तः। परं अञ्जनविधिः पुरोडाशश्रपणानन्तरं भवति। अतः काण्वसंहितायां विद्यमानं मन्त्रस्यास्य स्थानमयोग्यं भाति।

उ. अतः सायणाचार्याः अपि वदन्ति "यस्ते प्राणः" - इत्यादिकः प्रयोगानुसारेणोपरिष्टादुत्कर्षणीयः अत एव कात्यायनस्तद्विनियोगमन्यत्रैवमुवाच।"

मन्त्रस्य अत्रस्थं स्थानमयोग्यमतः तस्य विनियोगः कात्यायनेन अन्यत्र उक्तः। इति सायणाचार्याणाम् आशयः।

इ. प्रयाजाः, आज्यभागौ प्रधानयागः तच्छेषप्राशनमिति विषयः भवन्ति। तत्र प्राशनार्थं हविश्चतुर्धा कृत्वा ब्रह्मणः इदँ, होतुः इदं, अध्वर्योः इदम्, अग्नीधः इदम् इति ऋत्विग्भ्यः आदिशेत्। तदानीं यजमानो मन्त्रं जपति -

"**अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्।** इति तथा च चतुर्द्धा कृतं परोडाशं विसृज्य यजमानः सस्वरं मन्त्रमिमं जपति -

**अमीमदन्त पितरो यथाभागमावृषायिषत** इति इत्यनयोः मन्त्रयोः कृते कात्यायनेन सूत्रद्वयं सूत्रितम्

१. **अत्र पितर** इति यजमानो जपति (का.श्रौ. ३.४.१३)

२. विसृज्या**मीमदन्ते**ति (का.श्रौ. ३.४.१४)

इति एतौ मन्त्रौ काण्वसंहितायाम् २.२.६; २.७.३ इत्यत्र पठितौ। माध्यन्दिनसंहितायां च २.३१ इत्यत्रैव पठितौ।

माध्यन्दिनसंहितायां केवलं पिण्डपितृयज्ञप्रसंगे मन्त्रौ निर्दिष्टौ। परं काण्वसंहितायां पुरोडाशदर्शने तथा च पिण्डपितृयज्ञप्रसंगे च प्रदत्तौ।

पिण्डपितृयज्ञप्रसंगे इमौ एव मन्त्रौ अन्यस्मिन् कर्मणि प्रयुक्तौ तत्रस्थे सूत्रे यथा -

१. **"अत्र पितर"** इत्युक्त्वोदङ्ङास्त आतमनात् (कात्या. श्रौ. ४.१.१३)

२. आवृत्या**ऽमीमदन्तेति** जपति (कात्या. श्रौ. ४.१.१४)

पिण्डानामाभिमुख्येन **"अत्र पितरः"** इति मन्त्रं जपित्वा अप्रदक्षिणमावृत्य उदङ्मुखो भूत्वा ग्लानिपर्यन्तं श्वासं निरुध्य प्रदक्षिणमावृत्य **अमीमदन्त** इति जपेत्। इति श्रौतसूत्रयोः आशयः।

**मन्त्राणां सूत्राणां च आशयः**

अ. विधिमनुसृत्य काण्वसंहितायां उभयत्र मन्त्राः पठिताः।

आ. पुरोडाशाचतुर्धाकरणानन्तरं माध्यन्दिनसंहितायां मन्त्राः न पठिताः परं २.३२ तः मन्त्रयोः स्वीकारः कर्मण्यस्मिन् करणीयो भवति।

५. काण्वसंहितामनुसृत्य सायणाचार्यैः काण्वसंहिताभाष्ये कात्यायनश्रौतसूत्रे विभागः, श्रौतसूत्रे किमपि परिवर्तनं वा कृतम्। काण्वसंहिताभाष्ये काण्वपाठस्य प्राधान्यमस्तु इति धिया अथवा काण्वपरम्परायाः श्रौतसूत्रं सायणाचार्याणां पुरतः स्यात् तदनुसारम् एतादृशं परिवर्तनं सायणाचार्यैः कृतम् इति अनुमातुं शक्यते।

यजमानः वेदेः पश्चादुपविश्य **"ततोऽसीति"** मन्त्रेण आशिषः प्रार्थयते। काण्वसंहितायां सम्बन्धिन्यः कण्डिकाः यथा -

**उरुविष्णो** विक्रमस्वोरु क्षयाय न स्कृधि।

घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिरं ॥ (काण्व सं. २.६.८) (माध्यं. सं. ५.३८)

**ततोसि** तन्तुरस्य नु मा तनुहि अस्मिन् यज्ञेऽस्याँ

साधुकृत्यायामस्मिन्नन्नेऽस्मिँल्लोके (काण्व सं. २.६.९)

इति एतयोः कण्डिकाभाष्ये सायणाचार्यैः -

"गच्छति प्राङ् उरुविष्णविति (कात्या. श्रौ. ३.८.२४) इति एकमेव सूत्रम् उद्धृतम्। तथैव

**उरुविष्णो**..... अस्मिँल्लोके इति एकमेव मन्त्रं कल्पयित्वा कण्डिकाद्वयस्य भाष्यं कृतम्।

कात्यायनश्रौतसूत्रे कण्डिकाद्वयं नाम मन्त्रद्वयं इति कल्पयित्वा सूत्रद्वयं निर्दिष्टम्। यथा -

१. "गच्छति प्राङ् उरुविष्णविति (कात्या. श्रौ. ३.८.२४)

२. ततोऽसि तन्तुरसि..... इति पुत्रस्य नाम गृह्णाति (कात्या. श्रौ. २.८.२२)

सायणाचार्यैः काण्वसंहितायाः २.६.८, २.६.९ इत्यनयोः कण्डिकयोः भाष्ये केवलं "गच्छति प्राङ् उरुविष्णविति..... (कात्या. ३.८.२४) इति एकमेव सूत्रं निर्दिष्टम्। द्वितीयं सूत्रं किमर्थं नोद्धृतम् इति प्रश्नः समुदेति।

काण्वसंहितायाम् ३.६.१० इत्यत्र मन्त्रः विद्यते -

"इदं मे कर्मेदँ वीर्यं पुत्रोऽनु संतनोतु (काण्व सं. २.८.१०)

इत्यस्याः कण्डिकायाः भाष्ये कात्यायनश्रौतसूत्रं निर्दिष्टम्

"पुत्रस्य नामगृह्णामि इदं मे इति - (कात्या. श्रौ. ३.८.२५)

**इदं मे**..... इत्यनेन प्रतीकेन **"इदं मे कर्मेदँ वीर्यं पुत्रोऽनु संतनोतु"** इत्यस्य मन्त्रस्य निर्देशो भवति।

यथा भाष्ये सूत्रस्य निर्देशः कृतः "पुत्रस्य नामगृह्णाति इदं मे इति" (कात्या. श्रौ. ३.८.२५) तथा सूत्रस्य स्वरूपं नास्ति कात्यायनश्रौतसूत्रे उद्धृतं सूत्रं। यथा -

"ततोऽसि तन्तुरस्यनु मा तनुह्यस्मिन्यज्ञेऽस्यां साधुकृत्यायामस्मिन्नन्नेऽस्मिँल्लोकऽ

**इदं मे कर्मेदं** वीर्यं पुत्रोऽनु सन्तनोत्विति पुत्रस्य नाम गृह्णाति (कात्या. श्रौ. ३.८)

**कात्यायनश्रौतसूत्रानुसारं -**

ततोऽसि तन्तुरस्यनु..... इदं मे कर्मेदं.......

इति कण्डिकाद्वयं मिलित्वा एको मन्त्रो भवति।

उरुविष्णो..... इति स्वतन्त्रो मन्त्रः वर्तते।

**परं सायणाभाष्यानुसारं -**

उरुविष्णो..... ततोसि......

इति कण्डिकाद्वयं मिलित्वा एको मन्त्रो भवति। इदं मे कर्मेदं..... इति स्वतन्त्रो मन्त्रः वर्तते अत एव काण्वभाष्ये श्रौतसूत्रस्याऽपि परिवर्तनं सायणाचार्यैः कृतम्।

"पुत्रस्य नामगृह्णाति इदं मे इति (कात्या. ३.८.२५) "इदं मे कर्मेदं वीर्यं पुत्रोऽनु सन्तनोतु।" इति अयं मन्त्रः माध्यन्दिनसंहितायां नास्ति। काण्वसंहितायामेव वर्तते। सायणाचार्यैः उद्धृते सूत्रे मन्त्रोऽयं प्रतीकपाठेनेव स्वीकृतः अतः सायणाचार्याणां पुरतः काण्वपरम्परायाः कात्यायनश्रौतसूत्रम् आसीद् वा इति चिन्तनमावश्यकम्।

**६. तात्पर्यम् -**

१. काण्वसंहितायामेव विद्यमानाः मन्त्राः कात्यायनश्रौतसूत्रे सकलपाठेन स्वीकृताः।

२. काण्वमाध्यन्दिनसंहितयोर्मध्ये कुत्रचित् भिन्नः पाठः स्यात् तर्हि प्रतीकपाठे त्रयः माध्यन्दिनपाठः एव कात्यायनश्रौतसूत्रे स्वीकृतः।

३. सर्वानुक्रमणिकायां कृतः ऋग्यजुषां विभागः माध्यन्दिनसंहितामनुसरति।

४. संहितायां विद्यमानं मन्त्राणां स्थानं यथाविधि वर्तते इति सामान्यतः वक्तुं शक्यते। तुलनात्मकदृष्ट्या माध्यन्दिनसंहितायां वर्तमानं मन्त्राणां स्थानं यथानिर्दिष्टं वर्तते।

५. काण्वसंहितायामनुसृत्य सायणाचार्यैः काण्वसंहिताभाष्ये कात्यायनश्रौतसूत्रे विभागः, श्रौतसूत्रे किमपि परिवर्तनं वा कृतम्। काण्वपरम्परायाः कात्यायनश्रौतसूत्रं सायणाचार्याणां स्याद् वा इति चिन्तनमावश्यकम्।

६. माध्यन्दिनसंहितापेक्षया काण्वसंहितायामधिकाः मन्त्राः निर्दिष्टाः अतः माध्यन्दिनसंहितायाः प्राथम्यं वक्तुं शक्यते इति मम मतम्।

**प्रो. रवीन्द्र अम्बादास मुळे**

संस्कृत-प्रगत-अध्ययन केन्द्रम्

पुणेविद्यापीठम्, पुणे